*No. of pages - 8* **(M)**

**मध्यावधि परीक्षा**

**कक्षा : नवमी**

**विषय : संस्कृतम्**

**TIME : 3 HRS.** **M.M. 80**

*निर्देशा:*

1. *प्रश्नपत्रे चत्वार: खण्डा: सन्ति।*
   *खण्ड 'क' अपठित-अवबोधनम् (10 अङ्का:)*
   *खण्ड 'ख' रचनात्मकं-कार्यम् (15 अङ्का:)*
   *खण्ड 'ग' अनुप्रयुक्त-व्याकरणम् (25 अङ्का:)*
   *खण्ड 'घ' पठित-अवबोधनम् (30 अङ्का:)*
2. *सर्वे प्रश्ना: अनिवार्या:।*
3. *प्रश्नसंख्या अवश्यं लेखनीया।*
4. *उत्तराणि संस्कृतेन एव लेखनीयानि।*
5. *प्रश्नानाम् उत्तराणि खण्डानुसार क्रमेण एव लेखनीयानि।*

**खण्ड 'क' अपठित-अवबोधनम् (10 अङ्का:)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

एकदा एका बालिका पित्रा सह मेलकं द्रष्टुं नगरं प्रति गच्छति स्म। सा चतुरमतिः धैर्यशालिनी च आसीत्। सा बाल्यकाले एवं विविधासु कलासु निपुणा आसीत्। मार्गे एका नदी आसीत्। सा नौकया गच्छति स्म। नौकायाम् अनेके जना: आसन्। नद्यां एक: मकर: आसीत्। द्वौ जनौ तस्मात् मकरात् भीतौ जले पतितौ। सा बालिका जले अकूर्दत तयो: च जनयो: हस्तौ गृहीत्वा नौकां प्रति आनयत्। 10

I एकपदेन उत्तरत - 1×4=4

i) बालिका केन सह गच्छति स्म?

(ii) मार्गे का आसीत्?

(iii) नद्यां का आसीत्?

(iv) नौकायां के आसन्?

II पूर्णवाक्येन उत्तरत- 2×1=2

(i) बालिका बाल्यकाले कीदृशी आसीत्?

III अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। 2×1=2

IV प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। 1×2=2

(i) 'कुशला' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्?

(अ) निपुणा (ब) पटव:

(स) प्रवीणा (द) पारङ्गता

(ii) 'एक: मकर:' अत्र विशेषणपदं किम्?

(अ) मकर: (ब) एक:

(स) अत्र (द) किम्

## खण्ड 'ख' रचनात्मकं-कार्यम् (15 अङ्का:)

2. रुग्णतावशात् अवकाशप्राप्त्यर्थं प्रधानाचार्याय लिखितमिदं पत्रं मञ्जूषाया: उचितपदै: सम्पूरयत। ½×10=5

सेवायाम् (i) __________

जानकी देवी विद्यालय

गाँधी नगरम्

(ii) __________

सविनयं (iii) ______________ अस्ति यत् अहं गतसोमवासरात् (iv) ______________ अस्मि। अस्मात् (v) ____________ विद्यालये आगन्तुम् न (vi) __________। अत: मह्यम् (vii) __________ अवकाशं प्रदाय (viii) ____________ भवन्त:।

(ix) __________


भवदीय: शिष्य:

(x) __________

**मञ्जूषा :** शक्नोमि, मान्यवर, रुग्ण:, संदीप:, प्राचार्यमहोदय:, निवेदनम्, कारणात्, कृतार्थयन्तु, दिनद्वयस्य, सधन्यवादम्

3. अधोदत्तचित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया पञ्चवाक्येषु कुरुत। 2×5=10

**मञ्जूषा :** कुटीर:, जना:, चित्रे, शुद्धवातावरणम्, एका, बालक:, नौका, द्वे, विहारम्, नाविकान्, वृक्षा:, स्वच्छजलम्, सन्ति, वनम्, तरत:, उभयत:, बालिका



अथवा

मञ्जूषात : उचितपदानि चित्वा 'पुस्तकालय:' इति विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत।

**मञ्जूषा :** केचन, पुस्तकानि, समाचारपत्राणि, छात्रा:, तूष्णीम्, अनेकानि, पठन्ति, पुस्तकालये, जना:, इंद, ग्रंथा:, वर्णनम्

## खण्ड 'ग' अनुप्रयुक्त-व्याकरणम् (25 अङ्का)

4. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा प्रश्नानाम् उत्तराणि लिखत – 1×5=5

(i) कस्य वर्णस्य उच्चारणस्थानं तालव्य:अस्ति ?

(अ) ब्  (ब) ज्  (स) ल्  (द) ख्

(ii) (ङ) वर्णस्य उच्चारणस्थानं किम् ?

(अ) कण्ठ:  (ब) तालु:  (स) दन्ता:  (द) मूर्धा:

(iii) नासिक्य: वर्ण: अस्ति ?

(अ) च्  (ब) ण्  (स) न्  (द) ह्

(iv) वर्ण-संयोज्य उचितं पदं चित्वा लिखत।

न् + आ + स् + इ + क् + आ = ___________

(अ) नासिका  (ब) नसिकी  (स) नसिका  (द) नासिक

(v) उचितं पदं चित्वा रिक्तस्थाने लिखत।

पुष्पाणि = प् + __ + ष् + प् + आ + __ + इ

(अ) ण्, उ  (ब) उ, ण्  (स) इ, ण्  (द) आ, ण्

5. अधोलिखित वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिः विच्छेदं वा प्रदत्तविकल्पैः चित्वा लिखत। 1×4=4

(i) रात्रौ <u>रजनीशः</u> भासते।

(अ) रज्न + ईशः (ब) रजनी + ईशः

(स) रजनि + इशः (द) राजन + ईशः

(ii) पिपीलकः योजनानां <u>शतान्यपि</u> याति।

(अ) शतन + अपि (ब) शतानि + अपि

(स) शतान् + अपि (द) शतनी + अपि

(iii) <u>बालः +तत्र</u> अस्ति।

(अ) बालात्र (ब) बालास्त

(स) बालतत्र (द) बालस्तत्र

(iv) जीवने उत् + लासः आवश्यकः।

(अ) उल्लासः (ब) उतल्लासः

(स) उत्लासः (द) उत्लास

6. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 1×4=4

(i) तस्मै श्री __________ नमः। (गुरु)

(अ) गुरवे (ब) गुरुम् (स) गुरुः (द) गुरुणा

(ii) वृक्षात् एतानि __________ अपतत्। (फल)

(अ) फलाय (ब) फलानि (स) फलम् (द) फले

(iii) तव नाम __________ अस्ति। (किम्)

(अ) कः (ब) केन (स) किम् (द) कान्

(iv) अत्र त्रयः __________ सन्ति। (साधु)

(अ) साधवः (ब) साधून् (स) साधुः (द) साधु

7. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 1×4=4

(i) 'हस्' धातोः लृट्लकारे मध्यमपुरुष द्विवचने रूपम् अस्ति।

(अ) हसिष्यथः (ब) हसिष्यन्ति

(स) हसथ (द) हसिष्यामि

(ii) श्रद्धावान् ________ ज्ञानम्।

(अ) लभेते (ब) लभते

(स) लभध्वे (द) लभे

(iii) यदि सत्संगतिरतो ________

(अ) भविष्यति (ब) भवन्ति

(स) भविष्यसि (द) भवति

(iv) आज्ञाकारी पुत्रः पितरौ ________।

(अ) सेवत् (ब) असेवत

(स) असेवेत् (द) असेव

8. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1×4=4

(i) ________ अभितः जलम् अस्ति।

(अ) मार्गस्य (ब) मार्गे (स) मार्गेण (द) मार्गम्

(ii) ________ सह रामः न आसीत्।

(अ) तम् (ब) तेन (स) तत् (द) तस्य

(iii) ________ पत्राणि पतन्ति।

(अ) वृक्षात् (ब) वृक्षम् (स) वृक्षे (द) वृक्षेभ्यात्

(iv) ________ पृष्ठतः बालकः पतितः।

(अ) मातरम् (ब) मात्रे (स) मात्रा (द) मातुः

9. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1×4=4

(i) ते मुनिं दृश् + क्त्वा प्रसन्नाः जाताः

(अ) दृष्ट्वा (ब) दृशक्त्वा (स) दृशवा (द) दृशय

(ii) हरि: <u>विहस्य</u> वार्तां करोति।

(अ) वि + ह + ल्यप् (ब) वि + हस् + ल्यप्

(स) हस् + ल्यप् (द) वि + हस् + य

(iii) स: लेखं **<u>लिख् + क्त्वा</u>** गतवान्।

(अ) लिखतवा (ब) लिखिता (स) लिखित्वा (द) लेखत्वा

(iv) त्वं कुत्र **<u>गम् + तुमुन्</u>** इच्छासि ?

(अ) गमतुम् (ब) गन्तुम् (स) गनतूम् (द) गतुम्

## खण्ड 'घ' पठित - अवबोधनम् (30 अङ्का)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

अस्ति उज्जयिन्यां माधव: नाम विप्र:। एकदा तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य स्नातुं गता। अथ ब्राह्मण: राज्ञा श्राद्धार्थं निमन्त्रित:। ब्राह्मण: सहजदारिद्र्यात् अचिन्तयत् – "यदि सत्वरं न गच्छामि तदा अन्य: कश्चित् श्राद्धार्थं वृत: भवेत्"। 6

I एकपदेन उत्तरत – 1×2=2

(i) विप्रस्य नाम किम् आसीत् ?

(ii) विप्र: कुत्र वसाति स्म ?

II पूर्णवाक्येन उत्तरत – 2×1=2

(i) ब्राह्मण: सहजदारिद्र्यात् किम् अचिन्तयत् ?

III प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत – 1×2=2

(i) गद्यांशे 'तस्य' इति पदं कस्मै प्रयुक्तम् ?

(अ) माधवाय (ब) भार्याय (स) राज्ञे (द) बालाय

(ii) गद्यांशे 'चिरं' इत्यस्य विलोमपदं किम् ?

(अ) आशु (ब) सत्वरं (स) शीघ्रम् (द) झटिति

11. पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 6

सद्भिस्तु लीलया प्रोक्तं शिलालिखितम् अक्षरम्।
असद्भि: शपथेनापि जले लिखितमक्षरम्।।

I एकपदेन उत्तरत – 1×2=2

(i) कैः प्रोक्तं शिलालिखितम् अक्षरं भवति?

(ii) कैः प्रोक्तं जलेलिखितम् अक्षरं भवति?

II पूर्णवाक्येन उत्तरत – 2×1=2

(i) सद्भिः प्रोक्तं कीदृशं अक्षरं भवति?

III प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1×2=2

(i) 'अक्षरं' इति पदस्य विशेषणपदं किं प्रयुक्तम्?

(अ) प्रोक्तम् (ब) लिखितम् (स) जले (द) शिला

(ii) 'सज्जनैः' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(अ) असद्भिः (ब) शिला (स) लीलया (द) सद्भिः

12. नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 6

लक्ष्मणः– एहि एहि आयुष्मान् भव (सुमन्त्रं वीक्ष्य) तात! कः अत्रभवान्?

सुमन्त्र :– तात! अयं भरतः कुमारः।

लक्ष्मणः– कुमार! इह तिष्ठ! त्वदागमनम् आर्याय निवेदयामि।

भरतः– आर्य। अचिरम् इदानीम् अभिवादायितुम् इच्छामि। शीघ्रं निवेद्यताम्।

I एकपदेन उत्तरत – 1×2=2

(i) 'कुमार! इह तिष्ठ!' इति कः कथयति?

(ii) कः रामम् अभिवादयितुम् इच्छति?

II पूर्णवाक्येन उत्तरत – 2×1=2

(i) कं वीक्ष्य लक्ष्मणः "कः अत्रभवान्" इति कथयति?

III प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – 1×2=2

(i) 'इदानीम् अभिवादयितुम् इच्छामि' अत्र अव्ययपदं किम्?

(अ) इच्छामि (ब) अत्र (स) इदानीम् (द) अभिवादयितुम्

(ii) 'अवलोक्य' इति पदस्य पर्यायपंद किं प्रयुक्तम्?

(अ) वीक्ष्य (ब) उपेत्य (स) आगत्य (द) तिष्ठ

13. श्लोकांशं पठित्वा मञ्जूषातः समुचितं पदं चित्वा अन्वयं पूरयत- 4

(I) गौरवं प्राप्यते दानात् न तु वित्तस्य संञ्चयात्। ½×4=2
स्थितिरुच्चैः पयोदानां पयौधीनामधः स्थितिः।।

अन्वयः- (i) __________ गौरवं प्राप्यते (ii) __________ संचयात् तु न। पयोदानां स्थितिः (iii) __________ पयोधीनाम् (iv) __________ अधः (भवति)।

(II) पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्। ½×4=2
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।।

अन्वयः- पृथिव्यां (i) अन्नं __________ सुभाषितम् (ii) __________ रत्नानि (सन्ति)। मूढैः (iii) __________ रत्नसंज्ञा (iv) __________

**मञ्जूषा :** (i) वित्तस्य, दानात्, उच्चैः, स्थितिः

(ii) पाषाणखण्डेषु, त्रीणि, विधीयते, जलम्

14. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1×4=4

(i) इन्द्रियाणां वशगः न स्यात्।

(ii) ब्राह्मणः दारिद्र्यात् अचिन्तयत्।

(iii) मनः न अनुभ्रामयेत्।

(iv) विद्याहीनाः पुत्राः न शोभन्ते।

15. प्रसंगानुसार रेखाङ्कितपदानां उचितम् अर्थं चित्वा लिखत - 1×4=4

(i) न द्रुमम् आरोहेत्।

(अ) वृक्षम् (ब) सोपानम् (स) पर्वतम् (द) यानम्

(ii) पित्रा में दुष्करं कृतम।

(अ) सामान्यम् (ब) कठिनम् (स) सरलम् (द) शुद्धम्

(iii) कीदृशः तनयः स्नेहः।

(अ) भागीनी (ब) पतिः (स) भ्राता (द) पुत्रः

(iv) अनृंत न ब्रूयात्।

(अ) अधिकम् (ब) अल्पम् (स) असत्यम् (द) सत्यम्